# Sarvadevakrita Shiva Stuti

# સર્વદેવકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Sarvadevakrita Shiva Stuti

File name : shivastutiHsarvadevakRRitA.itx

Category : shiva, shivarahasya, stuti, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 57 - sarvadevastutiH | 1-45||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 19, 2023

*sanskritdocuments.org*

# સર્વદેવકૃતા શિવસ્તુતિઃ

ઈશ્વરઃ -
દેવૈર્ગણેન્દ્રૈર્મુનિભિસ્સ્તુતોઽહં તત્ર તત્ર હિ ।
તત્સ્તુતિં સાવધાનેન મત્તશ‍ૃણુ નગાત્મજે ॥ ૧॥

વિષ્ણુબ્રહ્માદયો દેવાસ્તથૈવ ગણપા મમ ।
માં તુષ્ટુવુર્મહાદેવં પદ્યૈર્ગદ્યૈર્મનોહરૈઃ ॥ ૨॥

વિષ્ણુઃ -
કનજ્જટાકુટીરગાં વિહઙ્ગસઙ્ગમણ્ડિતાં કરિપ્રિયાઙ્ગસઙ્ગતાં મુખાબ્જકાન્તિરઙ્ગિતામ્ ।
કપર્દકોટિસઙ્ગતાં કથાસુધાતરઙ્ગિણીં ભજામિ શમ્ભુમૌલિગાં મહેશ્વરં નતોઽસ્મ્યહમ્ ॥ ૩॥

ખરાદિખઙ્ગસંહતિપ્રપઞ્ચબન્ધનાન્તક પ્રખાસચન્દ્રહાસધૃક્ ।
અખણ્ડખણ્ડપર્શુજપ્રભાવિતર્દિકેવતત્ક્ષણજ્ઞપારણસ્ફુરત્ખરાદિદુષ્ટગર્વહૃત્ ॥ ૪॥

બ્રહ્મા -
મનોતિગં વચોતિગં ગણાતિગં ગુણાતિગં ભુજઙ્ગરાજભોગગાર્ચિતાઙ્ઘ્રિહૃત્પથોજગમ્ ।
તરઙ્ગિણીતરઙ્ગજપ્રફુલ્લપદ્મનાલગં ભજામિ રત્નરઙ્ગગં કુરઙ્ગપાણિમીશ્વરમ્ ॥ ૫॥

હિરણ્યદં મહીપ્રદં પશુપ્રદં સુતપ્રદં હરાજવિષ્ણુમર્વદપ્રદાનભોગમોક્ષદમ્ ।
ભજામિ દેવદૈવતં ગુહાહિતં જગદ્ધતં પ્રભાવિતં સુભાષિતં મહાશ્રુતીડિતં શિવમ્ ॥ ૬॥

રુદ્રઃ -
મહાહિરાજકઙ્કણં ધરાધૃગાત્મજાસખં જ્વલત્ત્રિશૂલધારિણં મુનીન્દ્રબાલપોષણમ્ ।
કુરઙ્ગબાલધારિણં સિતત્રિપુણ્ડ્રધારિણં ભજામિ સોમધારિણં કરીન્દ્રકૃત્તિધારિણમ્ ॥ ૭॥

પ્રકૃષ્ટસામઘોષિણં સુધાંશુખણ્ડદીધિતિપ્રચણ્ડમૌલિમણ્ડલં
સુકુણ્ડલીકૃતાચ્છગણ્ડકુણ્ડલીશ્વરં પ્રભુમ્ ।
અખણ્ડદિવ્યદીધિમત્સુચન્દ્રખણ્ડદેહકં વિધાતૃમુણ્ડપણ્ડજપ્રકાશમાલજાલકમ્ ॥ ૮॥

ભજામિ ચણ્ડતાણ્ડવં ઘનાણ્ડજાણ્ડજપ્રિયં તુહણ્ડહુણ્ડકપ્રિયં મહોરુબહુદણ્ડકમ્ ।

ઇન્દ્રઃ -

પુરાન્તકં સ્મરાન્તકં ભગાન્તકં મખાન્તકં ગજાન્ધકાન્તકાન્તકં શિવં સદા હૃદમ્બુજે ॥ ૯॥

વાયુઃ -

સુદક્ષદક્ષશિક્ષકં મહોક્ષવાહકક્ષગં સુપક્ષિવાહનપ્રિયં મયસ્કરં યશસ્કરં ।
તિરસ્કરં મહેનસાં મહસ્કરતતિપ્રભં તિરસ્કૃતં દુરાત્મનાં ॥ ૧૦॥

સુમસ્કરીમનોગતં સુતસ્કરં હવિષ્કરં ભજામિ શઙ્કરં સદા હૃદન્તરે સુવિસ્તરમ્ ॥ ૧૧॥

અગ્નિઃ -

શુભાઙ્ગદં શુભાસ્પદં સુરેષુ દત્તતત્પદં મહાવિભૂતિધારિણં સુભૂતિદં સુમોક્ષદમ્ ।
ભવાદિહીનબોધદં કરીન્દ્રચર્મવસ્ત્રકમખણ્ડસોમમણ્ડલપ્રદં ભજે શિવં સદા ॥ ૧૨॥

યમઃ -

હરં સુભક્તતત્પરં ગરન્ધરં જ્વલન્ધરં પ્રબુદ્ધશત્રુસંહરં મયસ્કરં મહેશ્વરમ્ ।
હરીશરં મહીધરોરુકાર્મુકં ભજામિ ભૂરથં હરમ્ ॥ ૧૩॥

સૂર્યઃ -

શરીરભોગસંહરં ભજામિ દેવભાસ્કરં હરઞ્ચ શઙ્કરં સદા ।
પરાત્પરં નટેશ્વરં જનાર્દનાર્દનં ફણીન્દ્રરાજહારકં સુમારમારકારકમ્ ॥ ૧૪॥

કુબેરઃ -

ધનાધિપં ગણાદિવૃન્દપાધિપમુમાધિપં વૃષાધિપં જગત્સુકારણાધિપમ્ ।
ભજામિ ચિત્સુખાધિપં નગાધિપં હૃદાધિપમ્ ॥ ૧૫॥

ચન્દ્રઃ -

શરચ્ચશીસમછવિં મહોક્ષપુચ્છચામરં મહાચ્છતરુકલ્પકપ્રસૂનગુચ્છમસ્તકમ્ ।
નિરિચ્છજનવલ્લભં તટિચ્છવિકપર્દકં હૃદિસ્થશિવમવ્યયં સુકચ્છપસ્તવેડિતમ્ ॥ ૧૬॥

વરુણઃ -

વિશિષ્ટાદ્વિશિષ્ટાદિશિષ્ટેષ્ટનષ્ટં ગિરિષ્ટં મહિષ્ટં તથા જ્યેષ્ટમીશમ્ ।
ભજામીષ્ટમષ્ટાકૃતિં ભક્તિતુષ્ટં કનિષ્ટઞ્ચ કષ્ટાદિકષ્ટૈકનાશમ્ ॥ ૧૭॥

અશ્વિનૌ -

કટિતટકરટિત્વચં જટાકુટીરાત્સુરપાટીરતટીતટોરુગઙ્ગાતટબદ્ધેન્દુકલાસટમ્ ।
વટોરુધારાનિકટાટઙ્કટકોટિટઙ્કહસ્તમ્ ॥ ૧૮॥

વસવઃ -

ભુજઙ્ગરાજહારકં મહાવિષાગ્નિધારકં ભવામ્બુધેસ્સુતારકં ભયાનકં મહેનસામ્ ।

ભજામહેઽન્તકાન્તકં મહેશ્વરત્વદાયકં સુરાસુરેન્દ્રનાયકં જટાઙ્ગનાર્ધકાયકમ્ ॥ ૧૯॥

મરુતઃ -

મહારિખં ભુજાંસુખાન્તરઙ્ગમદ્રજાસખં સુસામજાતસન્મુખં ત્રિદદ્ધયોન્મુખોન્મુખમ્ ।
બહિર્મુખૈસ્સુદુર્મુખં હસન્મુખં સમસ્તદુઃખદુર્મુખં ભજે શિવં હૃદા સદા ॥ ૨૦॥

શિખીસખાસખં જલાસખં નટત્વશેષસન્મુખં હૃદિ ॥ ૨૧॥

રુદ્રાઃ -

દૃગઞ્ચલસ્ફુલિઙ્ગલેશભસ્મિતાઙ્ગનઙ્ગભસ્મસઙ્ગતમ્ ।
પતઙ્ગદૃક્સમાન્તરઙ્ગમિન્દુધામગં વિહઙ્ગવાહનાર્ચિતમ્ ॥ ૨૨॥

ભજે શિવં દૃગઙ્ગતં શિવાઙ્ગકં પાથોજગાર્ચિતાઙ્ગમૌલિસઙ્ગતમ્ ।
સુદક્ષદક્ષશિક્ષકં મહોક્ષવાહકક્ષગં સુપક્ષિવાહનપ્રિયં ભજામ્યધોક્ષજાર્ચિતમ્ ॥ ૨૩॥

હૃદક્ષહી નમક્ષતં ત્વપક્ષયાદિવર્જિતં ભજામિ ભક્તજાલકે હ્યપેક્ષયા સુવર્જિતમ્ ॥

ક્ષપેશમૌલિમીક્ષણીકૃતાન્જમિત્રકાનનમલક્ષમક્ષતા-
ક્ષદૃશ્યવિગ્રહં વિરૂપકાક્ષમીશ્વરં ભજે સદા હૃદન્તરે ॥ ૨૪॥

આદિત્યાઃ -

ગણાધિનાથનાથિતાખિલપ્રપઞ્ચગાધિજાતસન્નુતં
દિગાધિગાયકાતિથીકૃતાબ્જદિવ્યપાદુકમ્ ।
ભજામિ રાત્રિનાથમૌલિકસ્ફુરત્સુરઞ્જનીતરઙ્ગિણીદિવાસનાથગં સદા ॥ ૨૫॥

ગણેશઃ -

અશેષશોષિતાખિલપ્રપઞ્ચજાતશેષકં મુનીષ્ટજાતપોષકં મહાહિશેષભૂષકમ્ ।
સમુદ્રનીરશોષકં પ્રકામમિષ્ટલોચનં મહામ્બુદપ્રકર્ષણં તટિત્સમાનઘોષણમ્ ॥ ૨૬॥

ભજામિ વેદભાષિણં વિધેસ્તુ સૃષ્ટિકારણમ્ ॥ ૨૭॥

સ્કન્દઃ -

ઘનસ્તનયુગક્ષકં ઘનસ્તનિતનિમ્નમેરુદાઘઘૃણાયુતસુચક્ષુષમ્ ।
નિરાકૃતાઘદસઙ્ઘકં ઘૃણાયુતં સ્વભક્તકે ધૃતાક્ષભૂતિસુપ્રિયં ઘનાભકણ્ઠમણ્ડલમ્ ॥ ૨૮॥

સ્વનન્નખાગ્રનિસ્સૃતવિધીજમુણ્ડમણ્ડલં ભજેઽન્તરઙ્ગચિદ્ઘનં સદાશિવં સદાહૃદિ ।

નન્દીશ્વરઃ -

ચરાચરં સુચઙ્કુરં કૃપીડયોનિધારકં નિશાચરાન્તકં
ચતુર્મુખાનનારવિન્દવેદજાલમસંસ્તુતં શિવમ્ ।

વિચારમાત્રગોચરં સુપઞ્ચવક્ત્રગોચરં સુનિશ્ચલં
હૃદન્તરે સુચામરૌઘવીજિતં મહોક્ષગં ભજે શિવમ્ ॥ ૩૦॥

ચણ્ડી -
હરિજ્જટાતટીનિકઙ્કટેભચર્મધારકં (નટાનટિકદમ્બચર્મધારકં)
કવાટહૃત્તટીનિકાટહંસકં વટોરુમૂલગં શિવં મહોત્કટમ્ ॥ ૩૧॥

ભૃઙ્ગી -
મૃડં દૃઢં પરીબૃઢં સુબાઢગાઢહૃદ્ગતં સુમૂઢવ્યૂઢસન્મુખં ક્રિયાસમૂહતર્પિતમ્ ।
અનૂઢકન્યકાદ્રિજાસખં સમૂહગૂઢહૃદ્ગતં
મહાકરામ્બુજોત્થિતપ્રકાશઢક્કવાદ્યકમ્ ॥ ૩૨॥

ઈશ્વરઃ -
ગીર્વાણૈરગૃતાર્થિભિઃ કિલ શિવે ક્ષીરાબ્ધિધારાર્ણવે
કૃત્વા વાસુકિરજ્જુમજ્જનવિધૌ મન્થાનમન્દ્રાચલમ્ ।
તસ્માદપ્યુદભૂન્મહામણિગણં ધેનૂગણં પઙ્કજા-
જ્જાતા ચોષધિનાયકસ્સુરતરુસ્સારઙ્ગતીરઙ્ગકૌ ॥ ૩૩॥

ધૂમોત્કીલિતકાલકૂટશબલજ્વાલાતિગં તે તતાઃ
કાન્દીશીકૃતદેવદૈત્યનિવહં દૃષ્ટ્વાહમેકો ઘૃણી ।
તત્પ્રાશ્યાખિલદેવસઙ્ઘવિનુતો નીલાચ્છકણ્ઠોઽભવમ્ ॥ ૩૪॥

અકપટપટુવાક્યમૌલિગુમ્ફૈસ્તટિનીજાલકમૌલિરાગહાખિલાગ્રઃ ।
કરટિત્વક્પટભૂતભૂતટોપો કપટિતદૂરહૃદબ્જનૃત્તટોપઃ ॥ ૩૫॥

સન્ધ્યાતાણ્ડવડમ્બરવ્યસનિનો ભર્ગસ્ય ચણ્ડભ્રમે
પ્રોન્નૃત્યદ્ભુજચણ્ડમણ્ડલભુવો જઞ્ઝાનિલાઃ કેવલમ્ ।
યેષામુચ્ચલતાં જવેન ઝટિતિ વ્યૂહેષુ ભૂમીભૃતા-
મુડ્ડીનેષુ બિડૌજસા પુનરસૌ દમ્ભોલિરાલોકિતઃ ॥ ૩૬॥

સર્વદેવાઃ -
ત્વલ્લિઙ્ગાર્ચનતો મહેશ શરદાં જીવેમ શમ્ભોશતં
ત્વન્નામાનિ સદા બ્રુવામ ચ વિભો ભક્તાન્હિ નન્દામ તે ।
લિઙ્ગં બિલ્વદલોત્તમાઙ્ગમસકૃત્પશ્યેમ પુણ્યાઃ કથા-
શ્શ◌ૃણ્વામઃ પ્રતિવાસરં ચ વિગતૈનસ્કા ભવામો વયમ્ ॥ ૩૭॥

શેષઃ -

વસુધાધરધારકં મહેશં વસુધારાધિપમિત્રમિત્રસંસ્થમ્ ।
હિમકરહિમભેષજાક્ષિયુગ્મં હિમગિરિસુતયાનતોઽસ્મિ દેવમાદ્યમ્ ॥ ૩૮॥

ઈશ્વરઃ -
પૃષ્ટેષ્ટલમકમઠાકૃતિલોકનાટ્યં ભૂદારદારિતર માતલતોઽતિદૂરમ્ ।
(પૃષ્ટોષ્ટલગ્નકમઠાકૃતિલોકનાથં ભૂદારદારિતર માતલતોઽતિદૂરમ્)।
બ્રહ્માણ્ડખર્પરમતીત્ય ગતોર્ધ્વમૌલિં લોકેશદૃષ્ટિવિરહાન્મમ લિઙ્ગમેતત્ ॥ ૩૯॥

તલ્લિઙ્ગપૂજનમુમે શ્રુતિમૌલિવાક્યસિદ્ધાન્તગર્ભિતપદપ્રપથેન ભાવ્યમ્ ।
તત્કશ્ચિદેવ કુરુતે મમ ચ પ્રસાદાનો વા સુરા ભરિતભક્તિરસા હિ કેચિત્ ॥ ૪૦॥

ચણ્ડાંશુપ્રકટપ્રદીપિતતમસ્સ્તોમૈકસીમા દિશઃ
ખદ્યોતદ્યોતનેવ પ્રભવતિ ભવતાં દેવજાલં સમગ્રમ્ ।
કિં નિમ્બાકતરુસ્સુરદ્રુમસમો ભૂયાત્તતો મે શિવે
હ્યજ્ઞાનં કિમુ વેદનેન સદૃશં વિષ્ણ્વાદયઃ કિં સમાઃ ॥ ૪૧॥

ગગનાતિગલિઙ્ગમૌલિમેતદ્ધરપાતાલતલાત્તમૂલભાગમ્ ।
મહસાધવલીકૃતાખિલાશં ભવદાશાસ્યસમં મમેષ્ટવાસમ્ ॥ ૪૨॥

ગગનગતમપારતેજસેદ્ધં જનિતાનન્દભરેણ દેવસઙ્ઘાઃ ।
અવનિતલનિવાસમસ્તકાસ્તે પરિબદ્ધાઞ્જલયો દદર્શુરીશમ્ ॥ ૪૩॥

સૂતઃ -
સુરકુવલયસોમં સોમધામોત્તમાઙ્ગં મધુરિમગુણસીમં ભૂમસામાદિગીતમ્ ।
સુમસમમૃદુકાયં ભીમમીશં ચ સોમં કુમતિપથવિદૂરં કામદં કામનાશમ્ ॥ ૪૪॥

કમલામલનેત્રપૂજ્યપાદં કમલારાતિજટાતટોરુભૂષમ્ ।
કલિતાલકગાઙ્ગતુઙ્ગલીલં કલશોદ્ભૂતમુનિપ્રપૂજિતાઙ્ગમ્ ॥ ૪૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે શિવપ્રોક્તં ક્ષેત્રપૂજનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૫૭ - સર્વદેવસ્તુતિઃ । ૧-૪૫॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 57 - sarvadevastutiH . 1-45..

Notes:
Śiva શિવ narrates to Devī દેવી, the eulogies offered by the various Devā-s દેવાઃ unto Him.

Encoded and proofread by Ruma Dewan

*Sarvadevakrita Shiva Stuti*

pdf was typeset on December 19, 2023

Please send corrections to *sanskrit@cheerful.com*